## न तिसृचतसृ । (४/३००)

तिसृ चतसृ इत्येतयोः नामि दीर्घो न भवति । तिसृणाम् । चतसृणाम् । इदमेव नामि [1]इति दीर्घ-प्रतिषेधवचनं ज्ञापकम् 'अचि र ऋतः' (७.२.१००/२५४१) इत्येतस्मात् पूर्वविप्रतिषेधेन नुडागमो भवति इति ॥

## छन्दस्युभयथा । (५/३८४०)

छन्दसि विषये तिसृचतस्रोः नामि परतः उभयथा [2]दृश्यते, दीर्घश्चादीर्घश्च । तिसृणां (मै. सं. ४.५.९) [3]मध्यदिने, तिसृणां (ऋ. ५.६९.२) मध्यदिने । चतसृणां (काठ. सं. २७.९) मध्यदिने, चतसृणां मध्यदिने ॥

## नृ च । (६/२८४)

नृ इत्येतस्य नामि [4]परे उभयथा भवति । त्वं नृणां (पै. २.१०.४) नृपते, त्वं नृणां (ऋ. १४३.७) नृपते केचिदत्र छन्दसि इति नानुवर्तयन्ति, तेन भाषायामपि [5]विकल्पो भवति[6] ॥

## नोपधायाः । (७/३७०)

[7]नान्तस्याङ्गस्य उपधायाः नामि परतो दीर्घो भवति । पञ्चानाम् । सप्तानाम् । नवानाम् । दशानाम् । नः इति किम् ? चतुर्णाम् । नामि इत्येव, चर्मणाम् ॥

## सर्वनामस्थाने चासम्बुद्धौ । (८/२८०)

[8]सर्वनामस्थाने च परतो[9]ऽसम्बुद्धौ नोपधायाः दीर्घो भवति । राजा, राजानौ, [10]राजानः । [11]राजानम्, राजानौ । सामानि तिष्ठन्ति । सामानि पश्य । सर्वनामस्थाने इति किम् ? राजनि । सामनि । असम्बुद्धौ इति किम् ? हे राजन् । हे तक्षन् ॥

## वा षपूर्वस्य निगमे । (९/३८४१)

षपूर्वस्य अचः [12]नोपधायाः निगमविषये सर्वनामस्थाने परतः असम्बुद्धौ वा दीर्घो भवति । 'स तक्षाणं तिष्ठन्तमब्रवीत्' (मै. २. ४. १) । स तक्षणं तिष्ठन्तमब्रवीत् । ऋभुक्षाणमिन्द्रम् । 'ऋभुक्षणमिन्द्रम्' (ऋ. १. १११. ४) । निगमे इति किम् ? [13]तक्षा, तक्षाणौ, तक्षाणः ॥

---

1. इति नास्ति ब. फ, परतः ह. 2. भवति फ. 3. मध्यंदिने क. 4. परे नास्ति फ, परतः ड. 5. उभयप्राप्तिः फ, उभयथा ह. 6. नृणाम् । नृणाम् इत्यधिकम् ड. 7. नकारान्तस्य फ. 8. नोपधायाः इति अनुवर्तते इत्यधिकम् ड. फ. ह. 9. सम्बुद्धिवर्जिते नान्तस्य फ. 10. राजानः नास्ति फ 11. राजानम् नास्ति फ. 12. नोपधायाः नास्ति फ. ह. 13. तक्षा नास्ति क.